# गौरगणोद्देशदीपिका

श्रीपरमानन्दसेनकविकर्णपूरस्य कृतिरियम्

May 7, 2003

श्री-वृन्दावन-भुवि पुरा सच्चिदानन्द-सान्द्रो
गौराङ्गीभिः सदृश-रुचिभिः श्याम-धामा ननर्त ।
तासां शश्वद्-दृढतर-परीरम्भ सम्भेदतः किं
गौराङ्गः सन् जयति स नवद्वीपमालम्भमानः ॥१॥

नमस्यामोऽस्यैव प्रिय-परिजनान्वत्सल-हृदः
प्रभोरद्वैतादीनपि जगद्-अघौघ-क्षय-कृतः ।
समान-प्रेमानः सम-गुण-गणास्तुल्य-करुनाः
स्वरूपाद्या येऽमी सरस-मधुरास्तानपि नुमः ॥२॥

गुरुं नः श्रीनाथाभिधमवनि-देवान्वय-विधुं
नुमो भूषा-रत्नं भुव इव विभोरस्य दयितम् ।
यदा स्यादुन्मीलन्-निरव-कर-वृन्दावन-रहः
कथास्वादं लब्ध्वा जगति न जनः कोऽपि रमते ॥३॥

पितरं श्री-शिवानन्दं सेन-वंश-प्रदीपकम् ।
वन्देऽहं परया भक्त्या पार्षदाग्र्यं महाप्रभोः ॥४॥

ये विख्याताः परिवराः श्री-चैतन्य-महाप्रभोः ।
नित्यानन्दाद्वैतयोश्च तेषामपि महीयसाम् ॥
गोपालानां च पूर्वाणि नामानि यानि कानिचित् ।
स्व-स्व-ग्रन्थे स्वरूपाद्यैर्दर्शितान्यादि-सूरिभिः ॥
विलोक्यान्यानि साधूनां मथुरौड्र-निवासिनाम् ।
गौडीयानामपि मुखान्निशम्य स्व-मनीषया ॥

विविच्याम्रेडितः कैश्चित्कैश्चित्तानि लिखाम्यहम् ।
नाम्ना श्री-परमानन्द-दासः सेवित-शाशनः ॥५॥

यद्वत्पुरा कृष्ण-चन्द्रः पञ्च-तत्त्वात्मकोऽपि सन् ।
यातः प्रकटतां तद्वद्गौरः प्रकटतामियत् ॥६॥
स्वाभिन्नेन यतः तत्त्वं पञ्च-तत्त्वमिहोच्यते ।
अन्यथा तद्-असम्बन्धात्तत्तत्त्वं स्याच् चतुष्टयम् ॥७॥
तद्-भिन्नं यत्तदेवात्र तदभिन्नं विभाव्यताम् ।
यतः स्वयेच्छया शक्त्या कृष्णस्तादृशतां गतः ॥८॥
अतः स्वरूप-चरणैरुक्तं तत्त्व-निरूपणे ।
उपाधि-भेदात्पञ्चत्वं तत्त्वस्येह प्रदर्श्यते ॥९॥
पञ्चतत्त्वात्मकं कृष्णं भक्त-रूप-स्वरूपकम् ।
भक्तावतारं भक्ताख्यं नमामि भक्ति-शक्तिकम् ॥१०॥

अस्यार्थो विवृतस्तैर्यः स सङ्क्षिप्य विलिख्यते ।
भक्त-रूपो गौरचन्द्रो यतोऽसौ नन्द-नन्दनः ॥
भक्त-स्वरूपो नित्यानन्दो व्रजे यः श्री-हलायुधः ।
भक्तावतार आचार्योऽद्वैतो यः श्री-सदाशिवः ॥
भक्ताख्याः श्रीनिवासाद्या यतस्ते भक्त-रूपिनः ।
भक्त-शक्तिर्द्विजाग्रण्यः श्री-गदाधर-पण्डितः ॥११॥

श्री-विश्वम्भराद्वैत-नित्यानन्दावधूतकाः ।
अत्र त्रयः समुन्नेया विग्रहाः प्रभवाश्च ते ॥
एको महाप्रभुर्ज्ञेयः श्री-चैतन्य-दयाम्बुधिः ।
प्रभू द्वौ श्री-युतौ नित्यानन्दाद्वैत-महाशयौ ॥
गोस्वामिनो विग्रहाश्च ते द्विजाश्च गदाधरः ।
पञ्चतत्त्वात्मक एते श्रीनिवासश्च पण्डितः ॥१२॥

यदुक्तं तत्र गोस्वामि-श्री-स्वरूप-पदाम्बुजैः —

त्रयोऽत्र विग्रहा ज्ञेयाः प्रभवश्चात्र ते त्रयः ।
एको महाप्रभुर्ज्ञेयो द्वौ प्रभू सम्मतौ सतं ॥१३॥
एषां पार्षद-वर्गा ये महन्तः परिकीर्तितः ।
नित्यानन्दगणाः सर्वे गोपाला गोप-वेशिनः ॥
एषां सम्बन्ध-सम्पर्कादुप-गोपाल-सत्तमाः ॥१४॥

तत्र श्रीमन्-नवद्वीपे विश्वम्भर-समीपतः ।
विलसन्ति स्म ते ज्ञेया वैष्णवा हि महत्तमाः ॥१५॥
नीलाचले ये ये ख्यातास्ते हि ज्ञेया महत्तराः ।
दक्षिणादि-दिशां याने यैर्यैः सङ्गो महाप्रभोः ।
ते ते महन्तो मन्तव्याः परे ज्ञेयाः स्वयोग्यतः ॥१६॥
अतः स्वरूप-चरणैरुक्तं गौर-निरूपणे ।
पञ्च-तत्त्वस्य सम्पर्कात् ये ये ख्याता महत्तमः ।
ते ते महन्तो गोपालाः स्थानाच् छ्रैष्ठ्यादि-वाचकः ॥१७॥

रसज्ञाः श्री-वृन्दावनमिति यमाहुर्बहु-विदो
यम् एतं गोलोकं कतिपय-जनाः प्राहुरपरे ।
सित-द्वीपं प्राहुर्परमपि पर-व्योम जगदुर्
नवद्वीपः सोऽयं जयति परमाश्चर्य-महिमा ॥१८॥

तस्मिन्वासम् उरीचकार नृ-हरिर्विश्वम्भराख्यं दधात्
तच्-चेष्टा-वशतः समस्त-महतां वासोऽपि तत्राभवत् ।
तैः साकं महती हरेरनुगुणाकारापि लीलाभवद्
यत्रासीज् जगतां मनोऽपि परमानन्दाय मग्नं यतः ॥१९॥

यः सत्ये सित-वर्णमादधदसौ श्री-शुक्ल नामाभवत्
त्रेतायां मखम् उन्मखाख्य उचितोऽभुद्रक्त-वर्णं दधत् ।
यः श्यामो दधदास वर्णकममुं श्यामं युगे द्वापरे
सोऽयं गौर-विधुर्विभाति कलयन्नामावतारं कलौ ॥२०॥

प्रादुर्-भूताः कलि-युगे चत्वारः सम्प्रदायिकः ।
श्री-ब्रह्म-रुद्र-सनकाः पाद्मे यथा स्मृताः ॥
अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः ।
श्री-ब्रह्म-रुद्र-सनका वैष्णवाः क्षिति-पावनाः ॥२१॥

तत्र माध्वी सम्प्रदायः प्रस्तवादत्र लिख्यते

परव्योमेश्वरस्यासीच् छिष्यो ब्रह्मा जगत्-पतिः ॥
तस्य शिष्यो नारदोऽभूद्व्यासस्तस्याप शिष्यताम् ।
शुको व्यासस्य शिष्यत्वं प्राप्तो ज्ञानावरोधतात् ॥
तस्य शिष्याः प्रशिष्याश्च बहवो भूतले स्थिताः ।

व्यासाल् लब्ध-कृष्ण-दीक्षो मध्वाचार्यो महा-यशः ॥
चक्रे वेदान्विभज्यासौ संहितां शत-दूषणीं ।
निर्गुणाद्ब्रह्मणो यत्र स-गुणस्य परिष्क्रिया ॥
तस्य शिष्योऽभवत्पद्मनाभाचार्यो महाशयः ।
तस्य शिष्यो नरहरिस्तच्-छिष्यो माधव-द्विजः ॥
अक्षोभ्यस्तस्य शिष्योऽभूत्तच्-छिष्यो जयतीर्थकः ।
तस्य शिष्यो ज्ञानसिन्धुस्तस्य शिष्यो महानिधिः ॥
विद्यानिधिस्तस्य शिष्यो राजेन्द्रस्तस्य सेवकः ।
जयधर्म-मुनिस्तस्य शिष्यो यद्-गण-मध्यतः ॥
श्रीमद्-विष्णुपुरी यस्तु भक्ति-रत्नावली-कृतिः ।
जयधर्मस्य शिष्योऽभूद्ब्राह्मणः पुरुषोत्तमः ॥
व्यास-तीर्थस्तस्य शिष्यो यश्चक्रे विष्णु-संहिताम् ।
श्रीमान्लक्ष्मीपतिस्तस्य शिष्यो भक्ति-रसाश्रयः ॥
तस्य शिष्यो माधवेन्द्रो यद्धर्मोऽयं प्रवर्तितः ।
कल्प-वृक्षस्यावतारो व्रज-धामनि तिष्ठितः ।
प्रीत-प्रेयो वत्सलतोज्ज्वलाख्य फल-धारिणः ॥२२॥
तस्य शिष्योऽभवच् छ्रीमानीश्वराख्य-पुरी-यतिः ॥
कलयामास शृङ्गारं यः शृङ्गार-फलात्मकः ॥२३॥
अद्वैतः कलयामास दास्य-साख्ये फले उभे ।
श्रीमान्रङ्गपुरी ह्य् एष वात्सल्ये यः समाश्रितः ॥२४॥

ईश्वराख्य-पुरीं गौर उररीकृत्य गौरवे ।
जगदाप्लावयामास प्राकृताप्राकृतात्मकम् ॥२५॥
स्वीकृत्य राधिका भाव कान्ति पूर्व सुदुष्करे ।
अन्तर्-बही रसाम्बोधिः श्री-नन्दनन्दनोऽपि सन् ॥२६॥
आद्य व्यूहोऽपि चैतन्यमविशद्यः पुरे पुरा ।
विचुक्षोभ मनस्तस्य दृष्ट्वा गन्धर्व-नर्तनम् ॥२७॥
द्वारका-स्थोऽपि भगवानविशत् श्री-शची-सुतम् ।
नानावतारः सुतराम् एक-काल प्रभावतः ॥२८॥
यथा श्यामोऽविशत्कृष्णं भगवन्तं पुरा स्वयम् ॥२९॥

योग-माया-बलादेते तिष्ठन्तोऽन्यत्र यद्यपि ।
तथापि प्राविशन् गौरेऽचिन्त्य-लक्षण-लक्षितः ॥३०॥

यथोक्तं व्यास-चरणैः प्रभास-खण्ड-मध्यतः ।
अचिन्त्याः खलु ये भावा न तंस्तर्केण योजयेत् ॥३१॥
रघुनाथं प्रविश्यापि यथा तिष्ठति भार्गवः ।
एवं श्री-नारद-मुखास्तिष्ठन्त्यन्येषु धामसु ।
तथैव प्रभुना सार्धं दिव्यन्ति श्रुति-देहवत् ॥३२॥
किन्तु यद्यद्भक्त-गणा यद्-यद्-भाव-विलासिनः ।
तत्-तद्-भावानुसारेण व्रजे तेषाममभूद्गतिः ॥३३॥
गौर-चन्द्रोदयेऽद्वैतं प्रति गौर-वचो यथा

दास्ये केचन केचन प्रणयिनः सख्यैक एवोभये
राधा-माधव-नैष्ठिकाः कतिपये श्री-द्वारकाधीशितुः ।
सख्यादाव् उभयत्र केचन परे ये वावतारान्तरे
मय्याबद्ध-हृदोऽखिलान्वितनवै वृन्दावनासङ्गिनः ॥३४॥ (चै. च. ना., १०.७३)

पर्जन्यो नामा गोपाल आसीत्कृष्ण-पितामहः ।
उपेन्द्र-मिश्रः सन् जातः श्री-हट्टे सप्त-पुत्रवान् ॥३५॥
महामन्याभिधा गोपी व्रजे यासीद्वरीयसी ।
कृष्ण-पितामही सैव नाम्नात्र कमलावती ॥३६॥

पुरा यशोदा-व्रजराज-नन्दौ
वृन्दावने प्रेम-रसाकरौ यौ ।
शची-जगन्नाथ-पुरन्दराभिधौ
बभूवतुस्तौ न च संशयोऽत्र ॥३७ ॥

अमू आविशताम् एव देवावदिति-कश्यपौ ।
श्री-कौशल्या-दशरथौ तथा श्री-पृश्णि-तत्-पती ॥३८ ॥
देवकी वसुदेवौ यौ पितरौ राम-कृष्णयोः ।
तावप्यमू अविशतामिति जल्पन्ति केचन ।
अन्यथा राम-मूर्तेः श्री-विश्वरूपस्य नोद्भवः ॥३९॥
रोहिणी वसुदेवौ यौ पितरौ राम-कृष्णयोः ।
पद्मावती-मुकुन्दौ तौ सन्तौ जातौ द्विजोत्तमौ ।
श्री-सुमित्रा-दशरथौ तावप्यविशताममू ॥४०॥

पौर्णमासी व्रजे यासीद्गोविन्दानन्द-कारिणी ।

आचार्यः श्रील-गोविन्दो गीत-पद्यादि-कारकः ॥४१॥
नाम्नाम्बिका व्रजे धात्री स्तन्य-दात्री स्थिता पुरा ।
सैवेयं मलिनी नाम्नी श्रीवास-गृहिणी मता ॥४२॥
अम्बिकायाः स्वसा यासीन्नाम्ना श्रीलकिलिम्बिका ।
कृष्णोच्छिष्टं प्रभुञ्जाना सेयं नारायणी मता ॥४३॥
पुरासीज् जनको राजा मिथिलाधिपतिर्महान् ।
अधुना वल्लभाचार्यो भीष्मकोऽपि च सम्मतः ॥४४॥
श्री-जानकी रुक्मिणी च लक्ष्मी नाम्नी च तत्-सुता ।
चैतन्य-चरिते व्यक्ता लक्ष्मी-नाम्नी च सा यथा ॥४५॥

सा वल्लभाचार्य-सुता चलन्ती
स्नातुं सखीभिः सुर-दीर्घिकायाम् ।
लक्ष्मीरनेनैव कृतावतारा
प्रभोर्ययौ लोचन-वर्त्म तत्र ॥४६॥

श्रीसनातनमिश्रोऽयं पुरा सत्राजितो नृपः ।
विष्णुप्रिया जगन्-माता यत्-कन्या भू-स्वरूपिणी ॥४७ ॥
उक्ता प्रसङ्गात्कलिना श्री-चैतन्य-विधूदये ।
भुवोंश-रूपां परमं च विष्णुप्रियां विदित्वा परिणीय कान्ताम् ॥४८॥ इत्यादि ।

विश्वामित्रोऽपि घटकः श्री-रामोद्वह-कर्मणि ।
रुक्मिण्या प्रेषितो विप्रो यश्च श्री-केशवं प्रति ।
तावरां वनमाली यत्कर्मणाचार्यतां गतः ॥४९॥
यश्च सत्राजिता विप्रः प्रहितो माधवं प्रति ।
सत्योद्वाहाय कुलकः श्री-काशीनाथ एव सः ॥५०॥
केनावान्तरभेदेन भेदं कुर्वन्ति सात्वताः ।
सत्यभामा प्रकाशोऽपि जगदानन्द-पण्डितः ॥५१ ॥
मथुरायां यज्ञसूत्रं पुरा कृष्णाय यो मुनिः ।
ददौ सान्दीपनिः सोऽभूदद्य केशवभारती ॥५२ ॥
पुरासीद्रघुनाथस्य यो वशिष्ठ मुनिर्गुरुः ।
स प्रकाश-विशेषेण गङ्गादास-सुदर्शनौ ॥५३ ॥

वृषभानुतया ख्यातः पुरा यो व्रज-मण्डले ।
अधुना पुण्डरीकाक्षो विद्यानिधिमहाशयः ॥५४॥

स्वकीय भावमासाद्य राधा विरह कातरः ।
चैतन्यः पुण्डरीकाह्वये तातावदत्स्वयम् ॥५५॥
प्रेमनिधितया ख्यातिं गौरो यस्मै ददौ सुखी ।
माधवेन्द्रस्य शिष्यत्वात् गौरवं च सदाकरोत् ॥५६॥

तत्-प्रकाश-विशेषोऽपि मिश्रः श्री-माधवो मतः ।
रत्नावती तु तत्-पत्नी कीर्तिदा कीर्तिता बुधैः ॥५७॥
अंशांशिनोरभेदेन व्यूह आद्यः शची-सुतः ।
बलदेवो विश्वरूपो व्यूहः सङ्कर्षणो मतः ॥५८॥
नित्यानन्दावधूतश्च प्रकाशेन स उद्यते ।
गौर-चन्द्रोदये धर्मं प्रतिवाक्यं कलेर्यथा ॥५९॥

अस्याग्रजस्त्वकृत दार-परिग्रहः सन्
सङ्कर्षणः स भगवान्भुवि विश्वरूपः ।
स्वीयं महः किल पुरीश्वरमापयित्वा
पूर्वं परिव्रजित एव तिरोबभूव इति ॥६०॥ (चै. च. ना., १.२५)

नित्यानन्दावधूतो मह इति महितं हन्त सङ्कर्षणो यः इति च ॥६१॥

यदा श्री-विश्वरूपोऽयं तिरोभूतः सनातनः ।
नित्यानन्दावधूतेन मिलित्वापि तदा स्थितः ॥६२॥

ततोऽवधूतो भगवान् बलात्मा
भवान्सदा वैष्णव-वर्ग-मध्ये ।
जज्वाल तिग्मांशु-सहस्र-तेजा
इति ब्रुवन्मे जनको ननर्त ॥६३॥

स्वांशेन शेषेण य एष शय्या
विष्णोश्च कृष्णस्य च वास-भूषा ।
स्वाङ्गस्य भूषा-वलयादि-रूपैर्
लीलाख्यया वेद-निगूढ-लीलाम् ॥६४॥

श्रीवारुणीरेवतवंशसम्भवे
तस्य प्रिये द्वे वसुधा च जाह्नवी ।
श्रीसूर्यदासस्य महात्मनः सुते
ककुद्मीरूपस्य च सार्यतेजसः ॥६५॥

केचित् श्री-वसुधा-देवीं कलावपि विवृण्वते ।
अनङ्गमञ्जरीं केचिज् जाह्नवीं च प्रचक्षते ।
उभयं तु समीचीनं पूर्वन्यायात्सतां मतम् ॥६६॥

सङ्कर्षणस्य यो व्यूहः पयोब्धि-शायि-नामकः ।
स एव वीरचन्द्रोऽभूच् चैतन्याभिन्न-विग्रहः ॥६७॥
अमुं प्राविशतां कार्यात्सजहौ निषठोल्मुकौ ।
मीनकेतन-रामादिर्व्यूहः सङ्कर्षणोऽपरः ॥६८॥
विष्णु-पादोद्भवा गङ्गा यासीत्सा निज नामतः ।
नित्यानन्दात्मजा जाता माधवः शन्तनुर्नृपः ॥६९॥
व्यूहस्तृतीयः प्रद्युम्नः प्रिय-नर्म-सखोऽभवत् ।
चक्रे लीला-सहायं यो राधामाधवयोर्व्रजे ।
श्रीचैतन्याद्वैततनुः स एव रघु-नन्दनः ॥७०॥
व्यूहस्तुर्योऽनिरुद्धो यो स वक्रेश्वर-पण्डितः ।
कृष्णावेशजनृत्येन प्रभोः सुखमजीजनत् ॥७१॥
सहस्र-गायकान्मह्यं देहि त्वं करुणा-मय ।
इति चैतन्य-पदे यः उवाच मधुरं वचः ॥७२॥
स्व-प्रकाशाविभेदेन शशिरेखा तमाविशत् ।
आविर्भावो गौर-हरेर्नकुल-ब्रह्मचारिणि ॥७३॥
आवेशश्च तथा ज्ञेयो मिश्रे प्रद्युम्न-संज्ञके ।
आचार्यो भगवान् खञ्जः कला गौरस्य कथ्यते ॥७४॥
गोपीनाथाचार्य-नाम्ना ब्रह्मा ज्ञेयो जगत्-पतिः ।
नव-व्यूहे तु गणितो यस्तन्त्रे तन्त्र-वेदिभिः ॥७५॥

व्रजे आवेश-रूपत्वाद्व्यूहो योऽपि सदाशिवः ।
स एवाद्वैत-गोस्वामी चैतन्याभिन्न-विग्रहः ॥७६॥
यश्च गोपाल-देहः सन्व्रजे कृष्णस्य सन्निधौ ।
ननर्त श्री-शिव-तन्त्रे भैरवस्य वचो यथा ॥७७॥
एकदा कार्त्तिके मासि दीप-यात्रा महोत्सवे ।
स-रामः सह-गोपालः कृष्णो नृत्यति यत्नवान् ॥७८॥
निरीक्ष्य मद्-गुरुर्देवो गोप-भावाभिलाषवान् ।
प्रियेण नर्तितुमारब्धश्चक्र-भ्रमण-लीलया ॥७९॥

श्री-कृष्णस्य प्रसादेन द्विविधोऽभूत्सदाशिवः ।
एकस्तत्र शिवः साक्षादन्यो गोपाल-विग्रहः ॥८०॥
महादेवस्य मित्रं यः कुवेरो गुह्यकेश्वरः ।
कुवेर-पण्डितः सोऽद्य जनकोऽस्य विदाम्बरः ॥८१॥
पुरा कुवेरः कैलासे सिद्ध-साध्य-निषेविते ।
जजाप परमं मन्त्रं शैवं श्री-शिव-वल्लभः ॥८२॥
ततो दयालुर्भगवान्वरं वृण्विति सोऽब्रवीत् ।
तदा कुवेरो वरयामास त्वं मे सुतो भव ॥८३॥
प्रार्थितस्तेन देवेशो वरदेशो सदाशिवः ।
जन्मन्यन्तरे पुत्रः प्राप्स्यामि पुत्रतां तव ॥८४॥
इति प्राप्य वरं कष्टं कियन्तं कालमास्थितः ।
कार्यादीश-वशात्सोऽद्याद्वैतस्य जनकोऽभवत् ॥८५॥

योगमाया भगवती गृहिणी तस्य साम्प्रतम् ।
सीता-रूपेणावतीर्णा श्री-नाम्ना तत्-प्रकाशतः ॥८६॥
तस्य पुत्रोऽच्युतानन्दः कृष्ण-चैतन्य-वल्लभः ।
श्रीमत्-पण्डित-गोस्वामि-शिष्यः प्रिय इति श्रुतम् ॥८७॥
यः कार्त्तिकेयः प्रागासीदिति जल्पन्ति केचन ।
केचिदाहू रस-विदोऽच्युत-नाम्नी तु गोपिका ॥
उभयं तु समीचीनं द्वयोरेकत्र सङ्गतात् ।
कार्त्तिकेयः कृष्ण-मिश्रस्तत्-साम्यादिति केचन ॥८८॥

नन्दिनी जङ्गली ज्ञेया जया च विजया क्रमात् ॥८९॥
श्रीवास-पण्डितो धीमान्यः पुरा नारदो मुनिः ।
पर्वताख्यो मुनि-वरो य आसीन्नारद-प्रियः ।
स राम-पण्डितः श्रीमान्स्तत्-कनिष्ठ-सहोदरः ॥९०॥
मुरारि गुप्तो हनुमानङ्गदः श्री-पुरन्दरः ।
यः श्री-सुग्रीव-नामासीद्गोविन्दानन्द एव सः ॥९१॥
विभीषणो यः प्रागासीद्रामचन्द्र-पुरी स्मृतः ।
उवाचातो गौर-हरिर्नैतद्रामस्य कारणम् ॥
जटिला राधिका-श्वश्रूः कार्यतोऽविशदेव तम् ।
अतो महाप्रभुर्भिक्षा-सङ्कोचादि ततोऽकरोत् ॥९२॥

ऋचीकस्य मुनेः पुत्रो नाम्ना ब्रह्मा महातपाः ।
प्रह्लादेन समं जातो हरिदासाख्यकोऽपि सन् ॥९३॥
मुरारि-गुप्त-चरणैश्चैतन्य-चरितामृते ।
उक्तो मुनि-सुतः प्रातस्तुलसी-पात्रमाहरन् ॥९४॥
अधौतमभिषप्तस्तं पिता यावनतां गतः ।
स एव हरिदासः सन् जातः परम भक्तिमान् ॥९५॥
वृन्दावने यः प्रागासन्नणिमाद्य्-अष्ट-सिद्धयः ।
त एवाष्टौ भक्त-रूपा भूता गौडे च ते यथा ॥९६॥
अनतश्च सुखानन्दो गोविन्दो रघुनाथकः ।
कृष्णानन्दः केशवश्च श्री-दामोदर-राघवौ ।
पुर्य्-उपाधि-क्रमाज् ज्ञेया अणिमाद्य्-अष्ट-सिद्धयः ॥९७॥
जायन्तेयाः स्थिता ऊर्ध्व-रेतसः सम-दर्शिनः ।
नव-भागवताः पूर्वं श्री-भागवत-संहिताः ॥९८॥
प्रत्यूचुर्जनकं तेऽद्य भूत्वा सन्न्यासिनः सदा ।
प्रभुना गौर-हरिणा विहरन्ति स्म ते यथा ॥९९॥
श्री-नृसिंहानन्द-तीर्थः श्री-सत्यानन्द-भारती ।
श्री-नृसिंह-चिदानन्द-जगन्नाथा हि तीर्थकाः ॥१००॥
तीर्थाभिधो वासुदेवः श्री-रामः पुरुषोत्तमः ।
गरुडाख्यावधूतश्च श्री-गोपेन्द्राख्य आश्रमः ॥१०१॥
लोके ये निधयः ख्याताः पद्म-शङ्खादयो नव ।
अत्रैव निधि-रत्नाख्य-गर्भ-जाताः प्रभोः प्रियाः ॥१०२॥
श्री-श्रीनिधिश्च श्री-गर्भः कवि-रत्नः सुधा-निधिः ।
विद्या-निधिर्गुण-निधी रत्न-बाहुर्द्विजाग्रणीः ।
श्रीमानाचार्यरत्नश्च श्री-रत्नाकर पण्डितः ॥१०३॥
नीलाम्बरस्चक्रवर्ती गौरस्य भावि-जन्म यत् ।
सभायां कथायमास तेनासौ गर्ग उच्यते ॥१०४॥
श्री-शच्या जनकत्वेन सुमुखो बल्लवो मतः ।
पतलाया व्रजे ख्याता ज्ञेया तस्य स-धर्मिणी ॥१०५॥
पुराणानामर्थ-वेत्ता श्री-देवानन्दपण्डितः ।
पुरासीन्नन्द-परिषत्-पण्डितो भागुरिर्मुनिः ॥१०६॥

काशीनाथो लोकनाथः श्रीनाथो रामनाथकः ।
चत्वारोऽमी ज्ञानी-भक्ताः सनकाद्या न संशयः ॥१०७॥
चतुर्ष्वप्य् एषु शब्देषु नाथ-शब्दस्य कीर्तनात् ।
चतुः-सनवदेवात्र चतुर्-नाथा उदीरितः ॥१०८॥

वेद-व्यासो य एवासीद्दासो वृन्दावनोऽधुना ।
सखा यः कुसुमापीडः कार्यतस्तं समाविशत् ॥१०९॥

भट्टो वल्लभ नामाभूच् छुको द्वैपायनात्मजः ॥११०॥
आचार्यः श्री-जगन्नाथो गङ्गा-दासः प्रभु-प्रियः ।
आसीन्निधु-वने प्राग् यो दुर्वासा गोपिका-प्रियः ॥१११॥
चन्द्रशेखर आचार्यश्चन्द्रो ज्ञेयो विचक्षणैः ।
श्रीमानुद्धव-दासोऽपि चन्द्रावेशावतारकः ॥११२॥
अतश्चैतन्य हरिणा कथितोऽयं निशापतिः ।
श्रीमद्विश्वेश्वराचार्यो यः प्रागासीद्दिवाकरः ॥११३॥

विश्वकर्मा पुरा योऽभूदद्य भास्कर-ठक्कुरः ।
भिक्षको वनमाली यः सुदामासीद्द्विजो पुरा ।
धनं प्राप्य प्रभोः सङ्गे दुःखं मत्वाभ्रमद्यतः ॥११४॥
वैकुण्ठे द्वार-पालौ यौ जयाद्य-विजयान्तकौ ।
तावद्य जातौ स्वेच्छातः श्री-जगन्नाथ-माधवौ ॥११५॥
पुण्डरीकाक्ष-कुमुदौ ख्यातौ वैकुण्ठ-मण्डले ।
गोविन्द-गरुडाख्यौ तौ जातौ गौडे प्रभोः प्रियौ ॥११६॥
गरुडः पण्डितः सोऽद्य गरुडो यः पुरा श्रुतः ।
पुरा योऽक्रूर-नामासीत्स गोपीनाथ-सिंहकः ।
इति केचित्प्रभाषन्तेऽक्रूरः केशवभारती ॥११७॥

पुरी परमानन्दो य आसीदुद्धवः पुरा ॥
इन्द्रद्युम्नो महाराजो जगन्नाथार्चकः पुरा ।
जातः प्रतापरुद्रः सन्सम इन्द्रेण सोऽधुना ॥११८॥
भट्टाचार्यः सार्वभौमः पुरासीद्गीष्पतिर्दिवि ॥११९॥

प्रिय-नर्म-सखा कश्चिदर्जुनः पाण्डवोऽर्जुनः ।
मिलित्वा समभूद्रामानन्द-रायः प्रभोः प्रियः ॥१२०॥
अतो राधा-कृष्ण-भक्ति-प्रेम-तत्त्वादिकं कृती ।

रामानन्दो गौरचन्द्रं प्रत्यवर्णयदन्वहम् ॥१२१॥
ललितेत्याहुरेके यत्तदेकेनानुमन्यन्ते ।
भवानन्दं प्रति प्राह गौरो यत्त्वं पृथा-पतिः ॥१२२॥
गोप्यार्जुनीयया सार्धम् एकीभायापि पाण्डवः ।
अर्जुनो यद्राय-रामानन्द इत्याहुरुत्तमाः ॥१२३॥
अर्जुनीयाभवत्तूर्णमर्जुनोऽपि च पाण्डवः ।
इति पाद्मोत्तर-खण्डे व्यक्तम् एव विराजते ।
तस्मादेतत्त्रयं रामानन्द-राय-महाशयः ॥१२४॥
व्रजे भक्ताः समासेन कथ्यन्तेऽथ यथा मतिः ॥१२५॥
पुरा श्रीदाम-नामासीदभिरामोऽधुना महान् ।
द्वात्रिंशता जनैरेव बाह्यं काष्ठम् उवाह यः ॥१२६॥
पुरा सुदाम-नामासीदद्य सुन्दर-ठक्कुरः ।
वसुदाम-सखा यश्च पण्डितः श्री-धनञ्जयः ॥१२७॥
सुबलो यः प्रिय-श्रेष्ठः स गौरीदास-पण्डितः ।
कमलाकर-पिप्पलाइ-नाम्नासीद्यो महाबलः ॥१२८॥
सुबाहुर्यो व्रजे गोपो दत्त उद्धारणाख्यकः ।
महेशपण्डितः श्रीमन्महाबाहुर्व्रजे सखा ॥१२९॥
स्तोककृष्णः सखा प्राग् यो दासः श्री-पुरुषोत्तमः ॥१३०॥
सदाशिव-सुतो नाम्ना नागरः पुरुषोत्तमः ।
वैद्य-वंशोद्भवो नाम्ना दामा यो बल्लवो व्रजे ॥१३१॥
नाम्नार्जुनः सखा प्राग् यो दासः स परमेश्वरः ।
कालः श्री-कृष्ण-दासः स यो लवङ्गः सखा व्रजे ॥१३२॥
खोलावेचतया ख्यातः पण्डितः श्रीधरो द्विजः ।
आसीद्व्रजे हास्य-कारी यो नाम्ना कुसुमासवः ॥१३३॥
बलराम-सखा कश्चित्प्रबलो गोप-बालकः ।
आसीद्व्रजे पुरा योऽद्य स हलायुध-ठक्कुरः ॥१३४॥
वरूथपः सखा नाम्ना कृष्ण-चन्द्रस्य यो व्रजे ।
आसीत्स एव गौराङ्ग-वल्लभो रुद्र-पण्डितः ॥१३५॥
गन्धर्वो यो व्रजे गोपः कुमुदानन्द-पण्डितः ॥१३६॥
पुरा वृन्दावने चेटौ स्थितौ भृङ्गर-भङ्गुरौ ।

श्री-काशीश्वर गोविन्दौ तौ जातौ प्रभु-सेवकौ ॥१३७॥
वृन्दावने स्थितौ प्राग् यौ भृत्यौ रक्तक-पत्रकौ ।
गौराङ्ग-सेवकावद्य हरिदास-बृहच्-छिशू ॥१३८॥
पयोद-वारिदौ प्राग् यौ नीर-संस्कार-कारिणौ ।
तावद्य भृत्यौ रामयिर्नन्दयिश्चेति विश्रुतौ ॥१३९॥
व्रजे स्थितौ गायकौ यौ मधुकण्ठमधुव्रतौ ।
मुकुन्दवासुदेवौ तौ दत्तौ गौराङ्गगायकौ ॥१४०॥
नटश्चन्द्रमुखः प्राग् यः स कारो मकरध्वजः ॥१४१॥
पुरासीद्यो व्रजे नाम्ना मृदङ्गी श्री-सुधाकरः ।
स श्री-शङ्कर-घोषोऽद्य दम्फ-वाद्य-विशारदः ॥१४२॥
आसीद्व्रजे चन्द्रहासो नर्तको रस-कोविदः ।
सोऽयं नृत्य-विनोदी श्री-जगदीशाख्य-पण्डितः ॥१४३॥
वेणुं च मुरलीं योऽधन्नाम्ना मालाधरो व्रजे ।
सोऽधुना वनमालाख्यः पण्डितो गौर-वल्लभः ॥१४४॥
वृन्दावने यौ विख्यातौ शुकौ दक्ष-विचक्षणौ ।
तावद्य जातौ मज्-ज्येष्ठौ चैतन्य-राम-दासकौ ॥१४५॥

अधुना बल्लवी-वर्गा ये ये भूताः प्रभु-प्रियाः ।
ते त एव प्रकाश्यन्ते यथा-मति यथा-श्रुतम् ॥१४६॥

श्री-राधा प्रेम-रूपा या पुरा वृन्दावनेश्वरी ।
सा श्री-गदाधरो गौर-वल्लभः पण्डिताख्यकः ॥१४७॥
निर्णीतः श्री-स्वरूपैर्यो व्रज-लक्ष्मीतया यथा ॥१४८॥
पुरा वृन्दावने लक्ष्मीः श्यामसुन्दर-वल्लभा ।
साद्य गौर-प्रेम-लक्ष्मीः श्री-गदाधर-पण्डितः ॥१४९॥
राधामनुगता यत्तल् ललिताप्यनुराधिका ।
अतः प्राविशदेषा तं गौर-चन्द्रोदये यथा ॥१५०॥

इयमपि ललितैव राधिकाली
न खलु गदाधर एष भू-सुरेन्द्रः ।
हरिरयमथवा स्वयैव शक्त्या
तिर्तयमभूत्सा सखी च राधिका च ॥१५१॥ (चै. च. ना., ३.४४)

ध्रुवानन्द-ब्रह्मचारी ललितेत्यपरे जगुः ।

स्व-प्रकाश-विभेदेन समीचीनं मतं तु तत् ॥१५२॥
अथवा भगवान् गौरः स्वेच्छयागात्रि-रूपताम् ।
अतः श्री-राधिका-रूपः श्री-गदाधर-पण्डितः ॥१५३॥
राधा-विभूति-रूपा या चन्द्रकान्तिः पुरा स्थिता ।
साद्य गौराङ्ग निकटे दास-वंश-गदाधरः ॥१५४॥
पूर्णानन्दा व्रजे यासीद्बलदेवप्रियाग्रणीः ।
सापि कार्य-वशादेव प्राविशतं गदाधरम् ॥१५५॥
पुरा चन्द्रावली यासीद्व्रजे कृष्ण-प्रिया परा ।
अधुना गौड-देशे सा कविराजः सदाशिवः ॥१५६॥
यस्या वक्षसि सुष्वाप कृष्णो वृन्दावने पुरा ।
सा श्री-भद्राद्य गौराङ्ग प्रियः शङ्कर-पण्डितः ॥१५७॥
पुरा श्री-तारका-पाल्यौ ये स्थिते व्रज-मण्डले ।
ते साम्प्रतं जगन्नाथ-श्री-गोपालौ प्रभोः प्रियौ ॥१५८॥
शैब्या यासीद्व्रजे चण्डी स दामोदर-पण्डितः ।
कुतश्चित्कार्यतो देवी प्राविशत्तं सरस्वती ॥१५९॥
कलामशिक्षयद्राधां या विशाखा व्रजे पुरा ।
साद्य स्वरूपगोस्वामी तत्तद्भावविलासवान्॥१६०॥
केश-विन्यासमकरोद्राधां चित्रा व्रजे पुरा ।
सेदनीं कविराजः श्री-वनमाली प्रभोः प्रियः ॥१६१॥
श्री-राधा-प्राण-रूपा या श्री-चम्पकलता व्रजे ।
साद्य राघव-गोस्वामी गोवर्धन-कृत-स्थितिः ।
भक्तिरत्न-प्रकाशाख्य-ग्रन्थो येन विनिर्मितः ॥१६२॥
तुङ्गविद्या व्रजे यासीत्सर्व-शास्त्र-विशारदा ।
सा प्रबोधानन्द-यतिर्गौरोद्गान-सरस्वती ॥१६३॥
इन्दुलेखा व्रजे यासीच् छ्री-राधायाः सखी पुरा ।
कृष्ण-दास-ब्रह्मचारी कृत-वृन्दावन-स्थितिः ॥१६४॥
रङ्गदेवी पुरा यासीदद्य भट्टो गदाधरः ।
अनन्ताचार्य गोस्वामी या सुदेवी पुरा व्रजे ॥१६५ ॥
श्री-काशीश्वर-गोस्वामी शशिरेखा पुरा व्रजे ।
धनिष्ठा भक्ष्य-सामग्रीं कृष्णायादाद्व्रजेऽमिताम् ।

सैव सम्प्रति गौराङ्ग-प्रियो राघव-पण्डितः ॥१६६॥
गुणमाला व्रजे यासीद्दमयन्ती तु तत्-स्वसा ।
रत्नरेखा कृष्णदासः कृष्णानन्दः कलावती ॥१६७॥
गौरसेनी पुरा नारायण-वाचस्पतिः कृती ।
पीताम्बरस्तु कावेरी सुकेशी मकरध्वजः ॥१६८॥
माधवी माधवाचार्य इन्दिरा जीव-पण्डितः ॥१६९॥
व्रजे यासीत्सुमधुरा तुङ्गविद्या प्रिया पुरा ।
विद्या-वाचस्पतिर्गौर-प्रियो व्रज-जन-प्रियः ॥१७०॥
बलभद्राख्यको भट्टाचार्यः श्री-मधुरेक्षणा ।
श्रीनाथ-मिश्रस्चित्राङ्गी कविचन्द्रो मनोहरा ॥१७१॥

व्रजे नान्दीमुखी यासीत्साद्य सारङ्ग-ठक्कुरः ।
प्रह्लादो मन्यते कैश्चिन्मत्-पित्रा न स मन्यते ॥१७२॥
कलकण्ठी-सुकण्ठ्यौ ये व्रजे गान्धर्व-नाटिके ।
रामानन्द-वसु-सत्यराजाश्चापि यथायथम् ॥१७३॥

व्रजे कत्यायनी यासीदद्य श्रीकान्त-सेनकः ॥१७४॥
व्रजाधिकारिणी यासीद्वृन्दा-देवी तु नामतः ।
सा श्री-मुकुन्द-दासोऽद्य खण्ड-वासः प्रभु-प्रियः ॥१७५॥
पुरा वृन्दावने वीरा दूती सर्वाश्च गोपिकाः ।
निनाय कृष्णनिकरं सेदानीं जनको मम ।
व्रजे बिन्दुमती यासीदद्य सा जानकी मम ॥१७६॥
पुरा मधुमती प्राण-सखी वृन्दावने स्थिता ।
अधुना नरहर्य्-आख्यः सरकारः प्रभोः प्रियः ॥१७७॥
पुरा प्राण-सखी यासीन्नाम्ना रत्नावली व्रजे ।
गोपीनाथाख्यकाचार्यो निर्मलत्वेन विश्रुतः ॥१७८॥
वंशी कृष्ण-प्रिया यासीत्सा वंशीदास-ठक्कुरः ।१७९॥

श्री-रूप-मञ्जरी ख्याता यासीद्वृन्दावने पुरा ।
साद्य रूपाख्य-गोस्वामी भूत्वा प्रकटतामियात् ॥१८०॥
या रूप-मञ्जरी-प्रेष्ठा पुरासीद्रति-मञ्जरी ।
सोच्यते नाम-भेदेन लवङ्ग-मञ्जरी बुधैः ॥१८१॥

साद्य गौराभिन्न-तनुः सर्वाराध्यः सनातनः ।
तम् एव प्राविशत्कार्यान्मुनि-रत्नः सनातनः ॥१८२॥
श्रीमल्-लवङ्ग-मञ्जर्याः प्रकाशत्वेन विश्रुतः ।
शिवानन्दश्चक्रवर्ती कृत-वृन्दावन-स्थितिः ॥१८३॥
अनङ्ग-मञ्जरी यासीत्साद्य गोपाल-भट्टकः ।
भट्ट-गोस्वामिनं केचिदाहुः श्री-गुण-मञ्जरी ॥१८४॥
रघुनाथाख्यको भट्टः पुरा या राग-मञ्जरी ।
कृत-श्री-राधिका-कुण्ड-कुटीर-वसतिः स तु ॥१८५॥
दास-श्री-रघुनाथस्य पूर्वाख्या रस-मञ्जरी ।
अमुं केचित्प्रभाषन्ते श्रीमतीं रति-मञ्जरीम् ।
भानुमत्य्-आख्यया केचिदाहुस्तं नाम-भेदतः ॥१८६॥
भूगर्भठक्कुरस्यासीत्पूर्वाख्या प्रेममञ्जरी ।
लोकनाथाख्यगोस्वामी श्रीलीलामञ्जरी पुरा ॥१८७॥
कलावती रसोल्लासा गुणतुङ्गा व्रजे स्थिता ।
श्रीविशाखाकृतं गीतं गायन्ति स्माद्य ता मताः ।
गोविन्दमाधवानन्द-वासुदेवा यथाक्रमम् ॥१८८॥
रागलेखा-कलाकेल्यौ राधा-दास्यौ पुरा स्थिते ।
ते ज्ञेये शिखि-माहाती तत्-स्वसा माधवी-क्रमात् ॥१८९॥
पुलिन्द-तनया मल्ली कालिदासोऽधुनाभवत् ॥१९०॥
शुक्लाम्बरो ब्रह्मचारी पुरासीद्यज्ञ-पत्निका ।
प्रार्थयित्वा यद्-अन्नं श्री-गौराङ्गो भुक्तवान्प्रभुः ।
केचिदाहुर्ब्रह्मचारी याज्ञिक-ब्राह्मणः पुरा ॥१९१ ॥
अपरे यज्ञ-पत्न्यौ श्रीजगदीशहिरण्यकौ ।
एकादश्यां ययोरन्नं प्रार्थयित्वाघसत्प्रभुः ॥१९२॥
मथुरायां पुरा यासीत्सैरन्ध्री कृष्ण-वल्लभा ।
साद्य नीलाचलावासः काशी-मिश्रः प्रभोः प्रियः ॥१९३॥
मलती चन्द्रलतिका मञ्जुमेधा वराङ्गदा ।
रत्नावली च कमला गुणचूडा सुकेशिनी ॥१९४॥
कर्पूर-मञ्जरी श्याम-मञ्जरी श्वेत-मञ्जरी ।
विलास-मञ्जरी कामलेखा च मौन-मञ्जरी ॥१९५॥

गन्धोन्मादा रसोन्मादा चन्द्रिका कलभाषिणी ।
गोपाली हरिणी काली कलाक्षी नित्य-मञ्जरी ॥१९६॥
कलकण्ठी कुराङ्गाक्षी चन्द्रिका चन्द्रशेखरा ।
या याः स्व-योग्य-सेवायां नियुक्ताः सन्ति राधया ॥१९७॥
गौरेण तत्-प्रियैः सार्धं धृत-पुरुष-विग्रहः ।
खेलन्ति स्म स्वभावानुसारात्ताः क्रमशो यथा ॥१९८॥
शुभानन्दो द्विजो ब्रह्मचारी श्रीधर नामकः ।
परमानन्द-गुप्तो यत्कृता कृष्ण-स्तवावली ॥१९९॥
रघुनाथो द्विजः कश्चिद्गौराङ्गानन्य-सेवकः ।
कंसारि-सेनः सेन-श्री-जगन्नाथो महाशयः ॥२००॥
सुबुद्धि-मिश्रः श्री-हर्षो रघु-मिश्रो द्विजोत्तमः ॥२०१॥
रिपवः षट्-काम-मुख्या जिता येन वशीकृताः ।
यथार्थ-नाम गौरेण जितामित्रः स निर्मितः ॥२०२॥
निर्मिता पुस्तिका येन कृष्ण-प्रेम-तरङ्गिणी ।
श्रीमद्भागवताचार्यो गौराङ्गात्यन्त-वल्लभः ॥२०३॥
सुशीलः पण्डितः श्रीमान् जीवः श्री-वल्लभात्मजः ।
वाणीनाथ-द्विजश्चम्पहट्ट-वासी प्रभोः प्रियः ॥२०४॥
ईशानाचार्य-कमलौ लक्ष्मीनाथाख्य-पण्डितः ।
गङ्गा मन्त्री जगन्नाथो मामूपाधिर्द्विजोत्तमः ॥२०५॥
श्रीकण्ठाभरणोपाधिरनन्तश्चट्ट-वंशजः ।
हस्ति-गोपाल-नामा च रङ्गवासी च वल्लभः ॥२०६॥
हर्य्-आचार्यो गौर-सङ्गी मिश्रः श्री-नयनस्तथा ।
कविदत्तो राम-दासश्चिरञ्जीव-सुलोचनौ ॥२०७॥
केचिन्महन्तः केचित्स्युर्महन्तश्चोपपूर्वकाः ।
उभयेषां गुणास्तुल्यास्तेनामी गणिता मया ॥२०८॥
खण्ड-वासौ नरहरेः सहाचार्यान्महत्तरौ ।
गौराङ्गैकान्त-शरणौ चिरञ्जीव-सुलोचनौ ॥२०९॥
गुरोर्नाम न गृह्णीतादिति शास्त्रानुसारतः ।
श्री-श्रीनाथस्य पूर्वाख्या मया न प्रकटीकृता ॥२१०॥
व्याचकार परिपाट्याद्यो भागवत-संहिताम् ।
कुमार-हट्टे यत्कीर्तिः कृष्णदेवो विराजते ॥२११॥

ये ये महन्तः क्रम-भङ्ग-भूतास्
ते मेऽपराधं कृपया क्षमन्तम् ।
गुणान्विनिर्णीय सतां समस्तान्
ब्रह्मेश-शेषाः कथितुं न शक्ताः ॥२१२॥

मीमांसकेभ्यः शठ-तर्किकेभ्यो
विशेषतो हेतु-रतेभ्य एव ।
गोप्यः प्रयत्नाद्रस-शास्त्र-विद्भ्यो
देयः सदा गौर-पदाश्रयेभ्यः ॥२१३॥

श्री-गौर-गणोद्देशा दीपिका रचिता मया ।
दीप्यतां परमानन्द-सन्दोह-भक्त-वेश्मनि ॥२१४॥

शके वसु-ग्रह-मिते मनुनैव युक्ते
ग्रन्थोऽयमाविरभवत्कतमस्य घस्रात् ।
चैतन्य-चन्द्र-चरितामृत-मग्न-चित्तैः
शोध्यः समाकलित-गौर-गणाख्य एषः ॥२१५॥